http://www.mpboardonline.com

त्रयमासिक परीक्षा—2017

कक्षा — दसवीं | समयः— घण्टात्रयम्

विषय — संस्कृत सामान्यम् | पूर्णांकः—100

निर्देशाः—

(1) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(2) प्रश्नानां सम्मुखे निर्धारिताः अङ्काः प्रदत्ताः।

प्रश्न—(1) उचितविकल्पं चित्वा लिखत— [5*1=5]

(क) "गिरीशः" इत्यस्मिन् पदे सन्धिः अस्ति

(1) दीर्घस्वरसन्धिः (2) गुणस्वरसन्धिः (3) यण (4) वृद्धि

(ख) "उच्चारणम्" इत्यस्य पदस्य सन्धिविच्छेदः अस्ति—

(1) उच्च+आरणम् (2) उच्+चारणम् (3) उत्+चारणम् (4) उच्चा+रणम्

(ग) "मनः+हरः" इत्यस्य सन्धिः अस्ति—

(1) मनाहरः (2) मनूहरः (3) मनसहरः (4) मनोहरः

(घ) अयादिस्वरसन्धेः उदाहरणम् अस्ति

(1) गजानुगतिः (2) पावकः (3) मातृणाम् (4) सत्कार

(ङ) अधोलिखितेषु अव्ययं नास्ति—

(1) कुत्र (2) पुत्र (3) तत्र (4) यत्र

प्रश्न—(2) उचितविकल्पं चित्वा लिखत— [5*1=5]

(क) 'बहुव्रीहिः' समासस्य उदाहरणम् अस्ति—

(1) चन्द्रशेखरः (2) परोपकारः (3) पितरौ (4) [illegible]

(ख) "चौरभयम्" इत्यस्य पदस्य समासविग्रहः अस्ति

(1) चौर भयम् (2) चौरेण भयम् (3) चौरात् भयम् (4) चौरस्य भयम्

(ग) 'पञ्चवटी' पदे समासः अस्ति—

(1) तत्पुरुषः (2) द्वन्द्वः (3) द्विगु (4) कर्मधारय.

(घ) 'प्रभागः' पदे उपसर्गः अस्ति—

(1) प्राग् (2) प्रा (3) प्र (4) भागा

(ङ) अधोलिखितेषु उपसर्गः नास्ति—

(1) उत् (2) उप (3) अप (4) सत्

प्रश्न—(3) उचितविकल्पं चित्वा लिखत— [5*1=5]

(क) 'गच्छन्ति' इत्यस्मिन् पदे पुरुषः अस्ति—

(1) प्रथमपुरुषः (2) मध्यमपुरुषः (3) उत्तमपुरुषः

(ख) 'अपश्यत' इत्यस्मिन् पदे वचनम् अस्ति—

(1) एकवचनं (2) द्विवचनं (3) बहुवचन

(ग) 'पास्यति' पदे लकारः अस्ति—

(1) लट् (2) लोट् (3) लङ् (4) लृट्

(घ) 'नेष्यामि' पदे धातुः अस्ति—

(1) नी (2) नेष (3) ने (4) नि

(ङ) सदाचारः एव परमोधर्मः । इत्यस्मिन् वाक्ये अव्ययम् अस्ति-

(1) सदाचार. (2) एव (3) परमो (4) धर्मः

प्रश्न—(4) उचितविकल्पं चित्वा लिखत— [5*1=5]

(क) 'पठन्' पदे प्रत्ययः अस्ति

(1) तुमुन् (2) शतृ (3) क्त (4) शानच्

(ख) 'ल्यप्' प्रत्ययस्य उदाहरणम् अस्ति

(1) गमनीयः (2) गत्वा (3) आगत्य (4) गतवान्

(ग) 'क्त्वा' प्रत्ययस्य उदाहरणं नास्ति—

(1) पठित्वा (2) ज्ञात्वा (3) लब्ध्वा (4) कृत.

(घ) 'लिखितवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति—

(1) शानच् (2) क्तवतु (3) क्त (4) शतृ

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

(ङ.) पठतो ............ मूर्खत्वम्।

(1) अस्ति (2) नास्ति (3) तथापि

प्रश्न–(5) प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत (कोऽपि पञ्च) [5*1=5]

(सुखानि, भोजनं, लघुत्वं, मार्गेण, श्रेष्ठः, रमणीयता )

(क) येन गतास्ताः ........

(ख) ज्येष्ठः ........ पूज्यते लोके।

(ग) न भवति ........ मनेत्।

(घ) तत्र प्रासादस्य ........ प्रासादाभिराम।

(ङ.) दानेन ........ पाणी भवन्ति।

(च) परसदननिविष्टः को न ........ याति।

प्रश्न–(6) अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम उत्तराणि एकवाक्येन संस्कृत भाषायां लिखत– [2*3=6]

(क) सुतापेक्षी कः आसीत् ?

(ख) सर्वप्राचीना भाषा का अस्ति ?

(ग) कः न विरुध्येत् ?

(घ) कः मृतोऽपि जीवति ?

प्रश्न–(7) अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत– (2)

(क) 'कवि' तृतीया विभक्तिः

(ख) 'फल' द्वितीया विभक्तिः

(ग) 'अस्मद्' प्रथमा विभक्तिः

प्रश्न–(8) 'कस्मात्' अथवा 'तेषाम्' इति पदस्य विभक्तिं वचनं च लिखत– (2)

प्रश्न–(9) युग्ममेलनं कुरुत– (4)

| अ | ब |
|---|---|
| (1) ज्येष्ठः | (1) देवराजः |
| (2) मान्यतम् | (2) वृक्षाः |
| (3) द्वारकापुरम् | (3) श्रेष्ठः |
| (4) प्राचीन | (4) वृक्षात् |

प्रश्न–(10). शुद्धवाक्यानां समक्षम् 'आम्' अशुद्ध वाक्यानां समक्षं 'न' इति लिखत– (4)

(1) ब्राह्मणी पतिव्रतधर्मिणी आसीत्।

(2) संस्कृत भाषायाः अपेक्षा ग्रीक भाषा अधिकपूर्णा वर्तते।

(3) एकः शून्यगृहम् अनुप्रविशति।

(4) वृक्षाणां छेदनं महत् पापम्।

प्रश्न–(11) अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत– (4)

(1) पटीरकस्य कथा आश्रयः ?

(2) भारतीयैकता रक्षकं किम् ?

(3) कदा दधि भुञ्जीत ?

(4) प्रजानाम् अन्तः स्थितम् किम् ?

(5) दयानन्दस्य जन्म कस्मिन् प्रदेशे अभवत् ?

प्रश्न–(12) प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत– (4)

प्रश्न–(13) स्वस्य प्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृत भाषायां लिखत। (4)

अथवा

स्वस्य मित्रस्य कृते एकं शुभकामनापत्रं संस्कृते लिखत।

प्रश्न–(14) अधोलिखितेषु पञ्च अशुद्ध कारकवाक्यानां शुद्धिः करणीया– (5)

(1) सः सर्पं खेलति।

(2) छात्राः क्रीडाक्षेत्रं क्रीडन्ति।

(3) वृक्षाण पत्रं पतति।

(4) पिता पुत्रस्य सह गच्छति।

(5) भवान् किं करोति।

http://www.mpboardonline.com

http://www.mpboardonline.com

(6) कृषकाः ग्रामे गच्छन्ति।

प्रश्न—(15) अधोलिखितवाक्यानां कथानुसारेण क्रम संयोजनं कुरुत— (5)

(1) ग्रामे एकः प्राचीनः न्यग्रोधवृक्षः आसीत्।

(2) अहम् अस्मिन् चिरात् वसामि।

(3) हे बान्धवः! श्रूयतां मे वचः।

(4) तस्य शाखायाम् एकः काकः वसन्नासीत्।

(5) अतः अस्योपरि ममैव अधिकारः वर्तते।

प्रश्न—(16) अधोलिखितेषु अपठितं गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत— (5)

समाजे अनेकेषां दुःखानां मूलकारणम् अज्ञानम्। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति। हिंसाचौर्यादयः ये उपद्रवाः अस्मान् पीडयन्ति तेषां मूले अशिक्षा एव वर्तते। ज्ञान प्रकाशेन अज्ञानस्य अन्धकारं हर्तुं सज्जाः भवेम।

(1) अस्य गद्यांशस्य शीर्षकं लिखत ?

(2) दुःखानां मूलकारणं किम् ?

(3) समाजे अनेके विकाराः कथं जायन्ते ?

(4) के उपद्रवाः अस्मान् पीडयन्ति ?

(5) 'अज्ञानात्' पदे का विभक्तिः अस्ति ?

प्रश्न—(17) अधोलिखितेषु गद्यांशेषु गद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत— [5*2=10]

(क) वरुणदेवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमिः वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। एते सर्वे वृक्षं सिञ्चन्ति पोषयन्ति रक्षन्ति च। ते न कदापि 'मम अधिकारः वर्तते' इति अवदन्। ते सर्वे परोपकारिणः। परं यूयं सर्वे परापकारिणः वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसङ्कल्पाः यूयं स्वाश्रयमेव नाशयथ।

(1) कः वृष्टिं वर्षति ?

(2) सूर्यदेवः किं प्रयच्छति ?

(3) वृक्षस्य आधारभूता का ?

(4) वायुः किं ददाति ?

(5) के परोपकारिणः ?

(ख). सामाजिक कुप्रथानां निवारणाय एषः आर्यसमाजस्य स्थापनां कृतवान्। महर्षिः स्त्रियां बालकानां दलितवर्गाणां गवां च उद्धाराय सदैव प्रायतत। स्वातन्त्र्य भावनापि प्रथममनेनैव महर्षिणास्माकं जागरिता। नानाविधानि दुःखानि सोढ्वापि नायं कर्तव्यविमुखो जातः। यस्यास्य महापुरुषस्य ख्यातिः सर्वत्र व्याप्ता।

(1) आर्यसमाजस्य संस्थापकः कः ?

(2) एषः किमर्थम् आर्यसमाजस्य स्थापनां कृतवान् ?

(3) महर्षिः केषाम् उद्धाराय सदैव प्रायतत ?

(4) अस्माकं हृदयेषु स्वातन्त्र्यभावना प्रथमं केन जागरिता ?

(5) कस्य ख्यातिः सर्वत्र व्याप्ता ?

(ग). गङ्गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म। तस्य गुरुकुले बहवः शिष्याः आसन्। वासुदेवः तस्य प्रियशिष्यः। तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरुः तम् आहूय अवदत्- "शिष्य! अधुना भवान् सर्वविद्यापारङ्गतः अस्ति। अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान्।"

(1) गङ्गातीरे कः वसति स्म ?

(2) बहवः शिष्याः कुत्र आसन् ?

(3) वासुदेवः कस्य प्रियशिष्यः आसीत् ?

(4) गुरुः शिष्यम् आहूय किम् अवदत् ?

(5) सर्वविद्यापारङ्गतः कः अभवत् ?

प्रश्न—(18) अधोलिखितेषु श्लोकेषु श्लोकद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत। [5*2=10]

(क) यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।।

(1) कस्य मनः दूरम् उदैति ?

(2) कः दूरङ्गम् अस्ति ?

(3) ज्योतिषाम् एकं ज्योतिः कः ?

(4) मे मनः किम् अस्तु ?

(5) 'शिव' इति शब्दस्य विलोम शब्दं लिखत ?

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

http://www.mpboardonline.com

(ख) गङ्गापापं शशी तापं दैन्यं कल्पतरुस्तथा।
पापं तापं च दैन्यं च घ्नन्ति सन्तोमहाशयाः।

(1) का पापं हन्ति ?

(2) शशी किं करोति ?

(3) कल्पतरूः किं हन्ति ?

(4) पापं तापं दैन्यं च के घ्नन्ति ?

(5) 'हन्ति' इत्यस्मिन् पदे वचनम् अस्ति ?

अथवा

(ख) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।

(1) चन्द्रोज्ज्वलाः हाराः कं न विभूषयन्ति ?

(2) वाण्येका पुरुषं किं करोति ?

(3) कानि खलु क्षीयन्ते ?

(4) सततं भूषणं किम् ?

(5) 'सततं' पदस्य समानार्थी पदं लिखत ?

प्रश्न–(19) अधोलिखितेषु एकं विषयं स्वीकृत्य संस्कृत भाषायां शतशब्देषु निबन्धं लिखत– 10

(1) संस्कृत भाषायाः महत्त्यम्

(2) मम दिनचर्या

(3 छात्रजीवनं

(4) सदाचारः

http://www.mpboardonline.com
Whatsapp @ 9300930012
Your old paper & get 10/-
पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से

http://www.mpboardonline.com

http://www.mpboardonline.com
http://www.mpboardonline.com